नम् ४ कुचन्दनम् ५ । इत्यमरः । १ । ६ । १३२ ॥ ताम्रसारम् ६ ताम्रवृक्षः ७ चन्दनम् ८ । इति रत्नमाला ॥ लोहितम् ९ शोणितचन्दनम् १० रक्तसारम् ११ ताम्रसारकम् १२ क्षुद्रचन्दनम् १३ अर्कचन्दनम् १४ । इति राजनिर्घण्टः ॥ रक्ताङ्गम् १५ प्रवालफलम् १६ । इति भावप्रकाशः ॥ पत्तङ्गम् १७ पत्तगम् १८ रक्तबीजम् १९ । इति शब्दरत्नावली ॥ अस्य गुणाः । अतिशीतलत्वम् । तिक्तत्वम् । दृग्गगतास्रदोषभूतपित्तकफकासज्वरभ्रान्तिजन्तुवमथुतृषानाशित्वञ्च । इति राजनिर्घण्टः । अपि च ।

"रक्तं शीतं गुरु स्वादु छर्द्दितृष्णास्रपित्तहृत् ।
तिक्तनेत्रहितं वृष्यं ज्वरव्रणविषापहम् ॥"
इति भावप्रकाशः ॥

अन्यच्च ।

"रक्तपित्तहरं बल्यं चक्षुष्यं रक्तचन्दनम् ॥"
इति राजवल्लभः ॥

रक्तचित्रकः, पुं, ( रक्तो रक्तवर्णश्चित्रकः । ) क्षुपविशेषः । राङ्गचिता इति भाषा ॥ तत्पर्य्यायः । कालः २ व्यालः ३ कालमूलः ४ अतिदीप्यः ५ मार्ज्जारः ६ अग्निः ७ दाहकः ८ पावकः ९ चित्राङ्गः १० महाङ्गः ११ । अस्य गुणाः । प्रवकायकरत्वम् । रुच्यत्वम् । कुष्ठघ्नत्वम् । लोहवेधकत्वम् । रसनियामकत्वम् । रसायनत्वञ्च । इति राजनिर्घण्टः ॥

रक्तचूर्णं, क्ली, ( रक्तं रक्तवर्णं चूर्णम् । ) सिन्दूरम् । इति हारावली । ४४ ॥ रक्तवर्णचूर्णमात्रञ्च ॥

रक्तजन्तुकः, पुं, (रक्तः रक्तवर्णो जन्तुः । ततः स्वार्थे कन् । अथवा रक्ता आसक्ता जन्तवोऽस्मिन् । ) भूनागः । इति राजनिर्घण्टः ॥ रक्तवर्णजन्तुमात्रञ्च ॥

रक्तजिह्वः, पुं, ( रक्ता रक्तवर्णा शोणितपानादौ आसक्ता वा जिह्वा यस्य । ) सिंहः । इति शब्दमाला ॥ रक्तवर्णजिह्वायुक्ते, त्रि ॥

रक्तझिण्टी, स्त्री, ( रक्ता रक्तवर्णा झिण्टी । ) रक्तवर्णझिण्टीपुष्पवृक्षः । तत्पर्य्यायः । कुरुवकः २ । इत्यमरः ॥ ( विशेषोऽस्याः कुरुवकशब्दे ज्ञातव्यः ॥ )

रक्ततुण्डः, पुं, ( रक्तौ तुण्डौ यस्य । ) शुकपक्षी । इति राजनिर्घण्टः ॥ लोहितमुखयुक्ते, त्रि ॥

रक्ततुण्डकः, पुं, ( रक्तस्तुण्डो यस्य । कन् । भूनागः । ) इति राजनिर्घण्टः ॥

रक्तत्वचा, स्त्री, ( रक्तानि त्वचान्यस्याम् । ) गोमूत्रिका । इति राजनिर्घण्टः ॥

रक्तत्रिवृत्, स्त्री, ( रक्ता त्रिवृत् । ) रक्तवर्णत्रिवृता । लाल तेउड़ी । इति भाषा ॥ तत्पर्य्यायः । कालिन्दी २ त्रिपुटा ३ ताम्रपुष्पिका ४ कृष्णवर्णा ५ मसूरी ६ अन्दता ७ काकनासिका ८ । अस्या गुणाः । तिक्तत्वम् । कटुत्वम् । उष्णत्वम् । रेचनत्वम् । ग्रहणीमलविष्टम्भहारित्वम् । हितकारित्वञ्च । इति राजनिर्घण्टः ॥ ( अस्या विशेषो यथा,—

"तयोर्मुख्यतरं विद्धि मूलं यदरुणप्रभम् ।
सुकुमारे शिशौ वृद्धे मृदुकोष्ठे च तत् शुभम् ॥"
इति चरके कल्पस्थाने सप्तमेऽध्याये ॥
"अरुणाभं त्रिवृन्मूलं श्रेष्ठं मूलविरेचने ॥"
इति सुश्रुते सूत्रस्थाने ४४ अध्यायः ॥ )

रक्तदन्तिका, स्त्री, ( रक्ता दन्ताः अस्याः ) रक्तदन्ता + स्वार्थे कन् । टापि अत इत्वम् । ) चण्डिका । यथा,—

"भक्षयन्त्याश्च तानुग्रान् वैप्रचित्तान् महासुरान् ।
रक्ता दन्ता भविष्यन्ति दाड़िमीकुसुमोपमाः ॥
ततो मां देवताः स्वर्गे मर्त्यलोके च मानवाः ।
स्तुवन्तो व्याहरिष्यन्ति सततं रक्तदन्तिकाम् ॥"
इति मार्कण्डेयपुराणे देवीमाहात्म्ये । ९१ । ४० ॥

रक्तदला, स्त्री, ( रक्तानि दलान्यस्याः । ) नलिका । चिविल्लिका । इति राजनिर्घण्टः ॥

रक्तदृक्, [ श् ] पुं स्त्री, ( रक्ता दृक् दृष्टिर्यस्य । ) कपोतः । इति केचित् ॥ रक्तवर्णचक्षुर्व्विशिष्टे, त्रि ॥

रक्तधातुः, पुं, ( रक्तो रक्तवर्णो धातुः । ) गैरिकम् । इति त्रिकाण्डशेषः ॥ ( अस्य पर्य्यायो यथा,—

"गैरिकं रक्तधातुश्च गैरेयं गिरिजन्तथा ।
सुवर्णगैरिकन्त्वन्यत्ततो रक्ततरं हि तत् ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥ )

ताम्रम् । इति राजनिर्घण्टः ॥ रक्तवर्णधातुमात्रञ्च ॥

रक्तनालः, पुं, ( रक्तो नालोऽस्य । ) जीवशाकः इति राजनिर्घण्टः ॥ ( विवरणमस्य जीवशाकशब्दे विज्ञेयम् ॥ )

रक्तनासिकः, पुं, ( रक्ता नासिकास्य । ) पेचकः । इति शब्दरत्नावली ॥ लोहितनासायुक्ते, त्रि ॥

रक्तपः, पुं, ( रक्तं पिवतीति । पा + कः । ) राक्षसः । इति मेदिनी । पे, २१ ॥ रक्तपानकर्त्तरि, त्रि ॥

रक्तपक्षः, पुं, ( रक्तौ पक्षौ अस्य । ) गरुड़ः । इति केचित् ॥

रक्तपत्रिका, स्त्री, ( रक्तानि पत्राण्यस्याः । स्वार्थे कन् । टापि अत इत्वञ्च । ) नाकुली । रक्तपुनर्नवा । इति राजनिर्घण्टः ॥ लोहितपत्रञ्च ।

रक्तपदी, स्त्री, क्षुद्रक्षुपविशेषः । यथा,—

"शमीपत्रा रक्तपदी समङ्गाञ्जलिकारिका ॥"
इति जटाधरः ॥

रक्तपद्मः, पुं क्ली, ( रक्तो रक्तवर्णो पद्मः । ) रक्तवर्णकमलम् । तत्पर्य्यायः । रक्तसरोरुहम् २ रक्तोत्पलम् ३ कोकनदम् ४ । इत्यमरः । १ । १० । ४२ ॥ अस्य प्रमाणं यथा,—

"येषा ललितकान्ताख्या देवी मङ्गलचण्डिका ।
वरदाभयहस्ता च द्विभुजा गौरदेहिका ।
रक्तपद्मासनस्था च जटामुकुटमण्डिता ।
रक्तकौषेयवस्त्रा च स्मितवक्त्रा शुभानना ।
नवयौवनसम्पन्ना चार्व्वङ्गी ललितप्रभा ॥"
इति तिथ्यादितत्त्वम् ॥

रक्तपल्लवः, पुं, ( रक्ताः पल्लवा अस्य । ) अशोकवृक्षः । इति राजनिर्घण्टः ॥ लोहितपत्रञ्च ॥

रक्तपा, स्त्री, ( रक्तं पिवतीति । पा + कः + स्त्रियां टाप् । ) जलौका । डाकिनी । इति मेदिनी । गे, २१ ॥ शोणितपानकर्त्तरि, त्रि ॥

रक्तपाकी, स्त्री, ( पच्यते इति । पच् + घञ् । रक्तः रक्तवर्णः पाको यस्याः । ) वृहती । इति राजनिर्घण्टः ॥

रक्तपाता, स्त्री, ( रक्तं पातयतीति । पत + णिच् + अच् । स्त्रियां टाप् । ) जलौका । इति शब्दरत्नावली ॥

रक्तपादः, पुं, ( रक्तौ पादावस्य । ) शुकपक्षी । इति हेमचन्द्रः ॥ (यथा, रामायणे । ७ । ६ । ५७ ।

"रक्षोगणस्योपरिष्टात् परिभ्रमति कालवत् ।
कपोता रक्तपादाश्च सारिका विद्रुता ययुः ॥"
तथा च याज्ञवल्क्यः । १ । १७५ ।
"चाषांश्च रक्तपादांश्च सौनं वल्लूरमेव च ।
मत्स्यांश्च कामतो जग्ध्वा सोपवासस्त्र्यहं चरेत् ॥" )

लोहितचरणयुक्ते, त्रि ॥

रक्तपादी, स्त्री, ( रक्ताः पादा अस्याः । ) लज्जालुः । ( अस्याः पर्य्यायो यथा,—

"लज्जालुः स्यात् शमीपत्रा समङ्गा जलकारिका ।
रक्तपादी नमस्कारी नाम्ना खदिरकेत्यपि ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

हंसपदी । इति राजनिर्घण्टः ॥

रक्तपायिनी, स्त्री, ( रक्तं पातुं शीलमस्याः । पा + णिनि । स्त्रियां ङीष् । ) जलौका । इति राजनिर्घण्टः ॥

रक्तपायी, [ न् ] त्रि, ( रक्तं पातुं शीलमस्य । पा + णिनिः । ) रक्तपानशीलः । इति व्याकरणम् ॥

रक्तपारदं, क्ली, ( रक्तं रक्तवर्णं पारदम् । ) हिङ्गुलम् । इति हारावली । १५५ ॥ जटाधरे, पुं ॥

रक्तपिण्डं, क्ली, ( रक्तं रक्तवर्णं पिण्डमिव । ) जवापुष्पम् । इति शब्दरत्नावली ॥

रक्तपिण्डकः, पुं, ( रक्तपिण्डमिवेति । रक्तपिण्ड + इवार्थे कन् । ) रक्तालुः । इति राजनिर्घण्टः ॥

रक्तपित्तं, क्ली, (रक्तदूषकं पित्तमिति । मध्यपदलोपी कर्म्मधारयः । "रक्तञ्च पित्तञ्च रक्तपित्तमिति द्वन्द्व इति सुश्रुतः । रक्तञ्च तत् पित्तञ्चेति रक्तपित्तं रागप्राप्तं पित्तमिति कर्म्मधारय इति चरकः ।" ) रोगविशेषः । तस्य निदानं यथा,
धन्वन्तरिरुवाच ।

"अथातो रक्तपित्तस्य निदानं प्रवदाम्यहम् ।
भृशोष्णतिक्तकट्वम्ललवणादिविदाहिभिः ॥
कोद्रवोद्दालकैश्चान्यैस्तद्युक्तैरतिसेवितैः ।
कुपितं पित्तलैः पित्तं द्रवं रक्तञ्च मूर्च्छयेत् ॥